# श्रीमद् भागवत रसिक कुटुंब

## ॥ अच्युताष्टकम् ॥

अच्युतं(ङ्) केशवं(म्) रामनारायणं(ङ्),
कृष्णदामोदरं(वँ) वासुदेवं(म्) हरिम्।
श्रीधरं(म्) माधवं(ङ्) गोपिकावल्लभं(ञ्),
जानकीनायकं(म्) रामचन्द्रं(म्) भजे।।1।।

अच्युतं(ङ्) केशवं(म्) सत्यभामाधवं(म्),
माधवं(म्) श्रीधरम् राधिकाराधितम्।
इन्दिरामन्दिरं(ञ्) चेतसा सुन्दरं(न्),
देवकीनन्दनं(न्) नन्दजं(म्) सन्दधे।।2।।

विष्णवे जिष्णवे शंखिने चक्रिणे,
रुक्मिणीरागिणे जानकीजानये।
वल्लवीवल्लभायार्चितायात्मने,
कंसविध्वंसिने वंशिने ते नमः।।3।।

कृष्ण गोविन्द हे राम नारायणं,
श्रीपते वासुदेवाजित श्रीनिधे।

अच्युतानन्त हे माधवाधोक्षज,
द्वारकानायक द्रौपदीरक्षकः।।4।।

राक्षसक्षोभितः(स्) सीतया शोभितो,
दण्डकारण्यभूपुण्यताकारणः।
लक्ष्मणेनान्वितो वानरैः(स्) सेवितो-
ऽगस्त्यसम्पूजितो राघवः(फ्) पातु माम्।।5।।

धेनुकारिष्टकानिष्टकृद्द्वेषिहा,
केशिहा कंसहृद्वंशिकावादकः।
पूतनाकोपकः(स्) सूरजाखेलनो,
बालगोपालकः(फ्) पातु मां सर्वदा।।6।।

विद्युदुद्योतवत्प्रस्फुरद्वाससं(म्),
प्रावृडम्भोदवत्प्रोल्लसद्विग्रहम्।
वन्यया मालया शोभितोरःस्थलं(ल्ँ),
लोहितांघ्रिद्वयं(व्ँ) वारिजाक्षं(म्) भजे।।7।।

कुंचितैः(ख्) कुन्तलैर्भ्राजमानाननं(म्),
रत्नमौलिं(ल्ँ) लसत्कुण्डलं(ङ्) गण्डयोः।
हारकेयूरकं(ङ्) कंकणप्रोज्ज्वलं(ङ्),
किंकिणीमंजुलं(म्), श्यामलं(न्) तं(म्) भजे।।8।।

अच्युतस्याष्टकं(य्ँ) यः(फ्) पठेदिष्टदं(म्),

प्रेमतः(फ्) प्रत्यहं(म्) पूरुषः(स्) सस्पृहम्।
वृत्ततः(स्) सुन्दरं (ङ्) कर्तृविश्वम्भरस्-
तस्य वश्यो हरिर्जायते सत्वरम्।।9।।

इति श्रीमच्छंकराचार्यकृतम् अच्युताष्टकं सम्पूर्णम्।।